# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

## अध्याय ४०

विसृज्य च महाबाहुरृक्षवानरराक्षसान् ।
भ्रातृभिः सहितो रामः प्रमुमोद सुखी सुखम् ॥१॥

अथापराह्णसमये भ्रातृभिः सह राघवः ।
शुश्राव मधुरां वाणीमन्तरिक्षात्प्रभाषिताम् ॥२॥

सौम्य राम निरीक्षस्व सौम्येन वदनेन माम् ।
कैलासशिखरात्प्राप्तं विद्धि मां पुष्करं प्रभो ॥३॥

तव शासनमाज्ञाय गतोऽस्मि धनदं प्रति ।
उपस्थातुं नरश्रेष्ठ स च मां प्रत्यभाषत ॥४॥

निर्जितस्त्वं नरेन्द्रेण राघवेण महात्मना ।
निहत्य युधि दुर्धर्षं रावणं राक्षसाधिपम् ॥५॥

ममापि परमा प्रीतिर्हते तस्मिन्दुरात्मनि ।
रावणे सगणे सौम्य सपुत्रामात्यबान्धवे ॥६॥

स त्वं रामेण लङ्कायां निर्जितः परमात्मना ।
वह सौम्य तमेव त्वमहमाज्ञापयामि ते ॥७॥

एष मे परमः कामो यत्त्वं राघवनन्दनम् ।
वहेर्लोकस्य संयानं गच्छस्व विगतज्वरः ॥८॥

तच्छासनमहं ज्ञात्वा धनदस्य महात्मनः ।
त्वत्सकाशं पुनः प्राप्तः स एवं प्रतिगृह्ण माम् ॥९॥

बाढमित्येव काकुत्स्थः पुष्पकं समपूजयत् ।
लाजाक्षतैश्च पुष्पैश्च गन्धैश्च सुसुगन्धिभिः ॥१०॥

गम्यतां च यथाकाममागच्छेस्त्वं यदा स्मरे ।
एवमस्त्विति रामेण विसृष्टः पुष्पकः पुनः ।
अभिप्रेतां दिशं प्रायात्पुष्पकः पुष्पभूषितः ॥११॥

एवमन्तर्हिते तस्मिन्पुष्पके विविधात्मनि ।
भरतः प्राञ्जलिर्वाक्यमुवाच रघुनन्दनम् ॥१२॥

अत्यद्भुतानि दृश्यन्ते त्वयि राज्यं प्रशासति ।
अमानुषाणां सत्त्वानां व्याहृतानि मुहुर्मुहुः ॥१३॥

अनामयाच्च मर्त्यानां साग्रो मासो गतो ह्ययम् ।
जीर्णानामपि सत्त्वानां मृत्युर्नायाति राघव ॥१४॥

पुत्रान्नार्यः प्रसूयन्ते वपुष्मन्तश्च मानवाः ।
हर्षश्चाभ्यधिको राजञ्जनस्य पुरवासिनः ॥१५॥

काले च वासवो वर्षं पातयत्यमृतोपमम् ।
वायवश्चापि वायन्ते स्पर्शवन्तः सुखप्रदाः ॥१६॥

ईदृशो नश्चिरं राजा भवत्विति नरेश्वर ।
कथयन्ति पुरे पौरा जना जनपदेषु च ॥१७॥

एता वाचः सुमधुरा भरतेन समीरिताः ।
श्रुत्वा रामो मुदा युक्तः प्रमुमोद सुखी सुखम् ॥१८॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com